# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा - शास्त्रिद्वितीयवर्षम्, सत्र-३** | **प्रश्नपत्रम् – ७**<br>(C.E.2.3.3 - NEW)<br>**श्रीमद्भगवद्गीता** | **गुणाः - ७०** |
| **विषयः - रामानुजवेदान्तः** | | |
| **दिनाङ्कः - ११/१२/२०१८** | | **समयः - ०२:०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधस्तनश्लोकेषु द्वयोः व्याख्यात्मकमुत्तरं ससन्दर्भं लिखत।** **( १० )**

(१) अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥

(२) गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥

(३) न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा॥

**प्रश्नः २ अधस्तनप्रश्नयोः कस्यचिदेकस्य सविस्तरम् उत्तरं यथासिद्धान्तं लिखत।** **( १० )**

(१) अर्जुनस्य विषादं दार्शनिकदृष्ट्या वर्णयत।

(२) प्रथमाध्यायस्य सारांशं सविस्तरं लिखत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधस्तप्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं यथाग्रन्थं लिखत।** **( १० )**

(१) आत्मनां स्वभावं प्रतिपादयत।

(२) आत्मनः तु अविनाशित्वं कथमुपपद्यते इति निरूपयत।

(३) ज्ञाननिष्ठायाः दुर्लभतां तत्प्राप्त्युपायं च सविशदं लिखत।

**प्रश्नः ४ अधस्तनप्रश्नयोः कस्यचित् प्रश्नस्यैकस्य सविस्तरम् उत्तरं लिखत।** **( १० )**

(१) आत्मनः स्वरूपं स्वाधीतग्रन्थदिशा प्रतिपादयत।

(२) स्थितप्रज्ञस्य स्वरूपमुपपादयत।

## तृतीयान्वितिः

**प्रश्नः ५ अधस्तनश्लोकेषु द्वयोः व्याख्यात्मकमुत्तरं यथाग्रन्थं लिखत । (१०)**

(१) लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

(२) प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥

(३) काम एष क्रोध एव रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्य सविस्तरमुत्तरं यथाग्रन्थं लिखत । (१०)**

(१) ज्ञानयोगाधिकारिणः अपि अकर्तृत्वानुसन्धानपूर्वकं कर्मयोग एव श्रेयान् इति सविशदं प्रतिपादयत ।

(२) कर्मणः स्वरूपं सविशदं वर्णयत ।

**प्रश्नः ७ अधस्तप्रश्नेषु केषाञ्चिद् दशानां प्रश्नानामतिलघूत्तराणि यथाग्रन्थं प्रेदयानि । (१०)**

(१) धृष्टद्युम्नः कस्य पुत्रः आसीत् ?

(२) भीष्माभिरक्षितं केषां बलम् अपर्याप्तम् ?

(३) सर्वप्रथमं कौ शंखं दध्मौ ?

(४) 'सीदन्ति मम गात्राणि मुखं च परिशुष्यति' इति कः उवाच ?

(५) प्रथमाध्याये कति श्लोकाः सन्ति ?

(६) 'गुडाकेशः' इत्यस्य कोऽर्थः ?

(७) शस्त्राणि कं न छिन्दन्ति ?

(८) प्रमाथीनि इन्द्रियाणि कस्य मनः प्रसभं हरन्ति ?

(९) कस्मात् संमोहः भवति ?

(१०) द्वितीयाध्यायस्य नामधेयं किम् ?

(११) कस्माद् भूतानि भवन्ति ?

(१२) पर्जन्यः कस्माद् भवति ?

(१३) कुत्र निधनं श्रेयः ?

(१४) इन्द्रियेभ्यः परं किम् ?

(१५) कर्मयोगः कस्मिन्नध्याये वर्णितः ?

--००--